**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 5
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# पाणिनीयम् अपादानस्वरूपविवेचनम्

**डॉ. अर्चना कुमारी**

सहायकाचार्या, संस्कृत पालि एवं प्राकृतविभागः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः धर्मशाला हि. प्र.

**Article Info**

Accepted : 05 Oct 2024
Published : 30 Oct 2024

**Publication Issue :**
September-October -2024
Volume 7, Issue 5

**Page Number :** 79-87

**शोधसारांशः** - विभिन्नानाम् आचार्याणां मते अपादानस्य स्वरूपं प्रतिपादितम्। तत्र दीक्षितभर्तृहरिकौण्डभट्टानाञ्च मते 'अपाय' शब्दःविश्लेषस्य हेतुभूतक्रियायाः बोधकः, नागेशमते 'अपाय' शब्दः गतिविशेषस्य वाचकः, ध्रुवञ्च सर्वेषां मतेऽवधिभूतमिति प्रतिपादितम्। तदनन्तरं सर्वेषां मते अपादानत्वं सोदाहरणं विवेचितम्। ततः विभागः वास्तवसम्बन्धपूर्वको बुद्धिपरिकल्पितसम्बन्धपूर्वकश्च द्विधा विभक्तः सोदाहरणं वर्णितः। तत्पश्चाद् भर्तृहरेः चलम् अचलमिति द्विविधमपादानं सोदाहरणं विवेचितम् । ततः निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा अपेक्षितक्रियं चेति त्रिधापादानं सोदाहरणं व्याख्यातम्। तत्पश्चात् पञ्चमीविभक्तिः विवेचिता। ततः कारके इत्यधिकारस्य महत्त्वं प्रदर्शितम्। तदनन्तरं ध्रुवमपायेऽपादानम् इति सूत्रातिरिक्तत्वमपादानत्वं प्रदर्श्य महाभाष्यानुसारं ध्रुवमपायेऽपादानम् इति सूत्रेणैव बौद्धस्यापि अपादानस्य विवक्षितत्वात् सर्वेषां सूत्राणां प्रत्याख्यानं तत्र प्रतिपादितम्। एवमाहत्यात्र अपादानस्वरूपं विवेचितम् ।

**साङ्केतिकाः शब्दाः** - अपादानम्, अपायः, ध्रुवम्, विभागः, निर्दिष्टविषयः, उपात्तविषयः, अपेक्षितविषयः, विवक्षा, बौद्धापायः ।

**प्रस्तावना** – सर्वेऽपि व्यवहाराः वाक्यनिबन्धाः । वाक्येषु च सर्वत्रापि आकांक्षायोग्यतासन्निधीनाम् अपेक्षा भवत्येव। एतद् विरहितानां वाक्यानाम् अनर्थकत्वं लोकेऽनुभूयते। अत एव दश दाडिमानि षडपूपाः इत्यादिवाक्यानां प्रत्येकं सार्थकत्वेऽपि परस्परमाकाङ्क्षाविरहाद् अनर्थकत्वमेव अङ्गीकृतं भाष्ये । न केवलं संस्कृतं वाक् अपितु विश्वस्य अन्याः सर्वाः अपि भाषाः आकांक्षायोग्यतासन्निधीन् अपेक्षयन्ते । तदेव व्याकरणेऽपि सामर्थ्यं द्विविधम् एकार्थीभावः व्यपेक्षा च इत्युक्तम् । व्यपेक्षायाः सर्वेऽपि निबन्धाः कारकाधीनाः। अत एव आकांक्षायाः प्रतिपादने कारकाणां नितान्तं महत्त्वं सर्वैरपि अङ्गीक्रियते। तत्र प्रथमकारकविशेषसंज्ञायाः मया विवेचनं प्रस्तूयते। सा च अपादानस्वरूपा ।

**अपादानम्** - अपादानसंज्ञाविधायकं सूत्रमस्ति– "ध्रुवमपायेऽपादानम्"[1] अस्मिन् सूत्रे 'अपाय'शब्दस्य अर्थः वर्तते विश्लेषः अर्थाद् विभागः। तथा ध्रुवशब्दस्यार्थः अस्ति अवधिभूतम्। एवम् अपायस्य विषये अवधिभूतपदार्थः ध्रुवशब्देन व्यवहृतः भवति। तस्य चध्रुवस्य अपादानसंज्ञा भवति। यथोक्तं दीक्षितेन – "अपायो विश्लेषः। तस्मिन्साध्ये ध्रुवमवधिभूतं

[1].पा0 सू0 1–4–24 1

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

कारकमपादानं स्यात्"।[2] यदा कस्यचित् कस्माच्चिद् विश्लेषः भवति तदा सः विश्लेषः केनचिद् अवधिना एव प्रकटीभवति । यथा – वृक्षात् पर्णं पतति, अत्र वृक्षः अवधिभूतः, किञ्च पतन–क्रियायाः जनकत्वात् कारकमपि। अतः वृक्षः अपादानसंज्ञकः भवति । **कारकवादे** अपादानत्वम् – परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वम् । वृक्षात्पर्णं पततीत्यादौ पर्णादिः अपादानत्ववारणाय परकीयेति ।[3]

**भूषणकारमते भर्तृहरिमते च अपादानत्वम्** – "अपायः विश्लेषस्तज्जनकक्रिया, तत्रावधिभूतमपादानम् इत्यर्थकादवधिभूतमिति भावः" [4] । अस्यार्थः दर्पणकार : एवं करोति – "अवधित्वञ्च प्रकृतधात्वर्थ विभागजनकतत्क्रियानाश्रयत्वे सति प्रकृतधात्वर्थजन्यविभागाश्रयत्वम्"[5] इति अपादानत्वम् । यथोक्तं भर्तृहरिणा–

"अपाये यदुदासीनं चलं वा यदि वाचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते" ।।[6]

अस्यां कारिकायां समापतितः 'अपाय'शब्दःविश्लेषस्य हेतुभूतक्रियायाः बोधकः । तथा उदासीनशब्दस्य वाच्यः अनाश्रयः । एवम् अतदावेशात् पदं क्रियायाःअनपायस्य बोधकः अस्ति । भट्टनागेशोऽपि समर्थयति – तदावेशाविवक्षणादित्यर्थः[7]। यथा– वृक्षात् पर्णं पतति। अत्र पद् धातोरर्थः अस्ति – विभागजन्यसंयोगानुकूलव्यापारः। तस्य व्यापारस्य आश्रयः वृक्षः न भवति तथा तद्व्यापारजन्यविभागाश्रयः वृक्षः भवति, अतस्तस्य अपादानसंज्ञा ।

यद्यपि विभागसंयोगौ द्विष्ठत्वाद् वृक्षपर्णयोः उभयत्र भवतः, अतः केवलं विभागाश्रयम् अपादानसञ्ज्ञकं स्वीकुर्मः चेद् वृक्षवत् पर्णस्यापि विश्लेषाश्रयत्वाद् अपादानत्वापत्तिः। अतः अपादानलक्षणे 'प्रकृतधात्वर्थविभागजनकतत्क्रियानाश्रयत्वे सति' इति विशेषणं योजितम् । **भट्टनागेशस्य मते अपादानत्वम् -** 'अपाय'शब्दः गतिविशेषस्य[8] वाचकः, स च गतिविशेषः विभागजन्यसंयोगानुकूलव्यापारस्वरूपः वर्तते । ध्रुवशब्दस्य लक्षणं तत्रोच्यते – अवधिभावोपगमाश्रयत्वे सति तदन्यस्य अवधित्वोपयोगिव्यापारस्य अनाश्रयः ध्रुवम्"[9] । फलतः नागेशमते

---

[2].दीक्षितः । भट्टोजिः । वैयाकरणसिद्धान्तकौमुदी । मूलमात्राम् । श्रीगोविन्दाचार्यः, सम्पादकः । कारकप्रकरणम् ।
ध्रुवमपायेऽपादानम् सूत्रस्थ वृत्तिः । पृ0 सं. – 87 ।

[3].श्रीजयरामन्यायपञ्चाननः । कारकवादः । श्रीनिवासवरखेडि, सम्पादकः । पूर्णप्रज्ञसंशोधनमन्दिरम् , पूर्णप्रज्ञविद्यापीठम्, बेङ्लूरु – 28 । पृ ० सं. –59 ।

[4].भट्टः । कौण्डः । वैयाकरणभूषणसारः । हरिवल्लभः । दर्पण व्याख्या। चन्द्रिकाप्रसादः । सुबोधिनी व्याख्या ।
चौखम्बा संस्कृत प्रतिष्ठान । सुबर्थनिर्णयः । पृ0 सं –178 ।

[5].तत्रेव । दर्पण टीका ।

[6].तत्रैव । पृ0सं – 179।

[7].भट्टः नागेशः । लघुशब्देन्दुशेखरः । कारकप्रकरणम् । पृ0 सं– 764 ।

[8].भट्टः नागेशः । लघुशब्देन्दुशेखरः । कारकप्रकरणम् । पृ0 सं–764

[9].भट्टः । कौण्डः । वैयाकरणभूषणसारः । हरिवल्लभः । दर्पण व्याख्या। चन्द्रिकाप्रसादः । सुबोधिनी व्याख्या ।
चौखम्बा संस्कृत प्रतिष्ठान । सुबर्थनिर्णयः । पृ0 सं –181 ।

तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वमपादानत्वम्[10] इति अपादानलक्षणं निष्पद्यते । अर्थात् तत् कर्तरि समवायसम्बन्धेन विद्यमाना सति तत्तत्क्रियया उत्पन्नः यः विभागः, तस्यविभागस्य आश्रयः अपादानमुच्यते । किन्तु सः विभागः तत्तद् वाक्ये उच्चरितधातोः वाच्यार्थ : न भवितव्यः, एतादृशी विभागाश्रयता एव अवधिः कथ्यते । यथा – चैत्रो ग्रामादायाति अत्र कर्तरि 'चैत्रे" समवायसम्बन्धेन विद्यमाना सति उत्तरदेशसंयोगानुकूलपादप्रक्षेपादिक्रियाजन्यः यः विभागः, तस्य विभागस्य अश्रयः ग्रामः भवति तथा 'गम्' धातोरर्थः विभाग : न भवति, अतः ग्रामस्य अपादानसंज्ञा भवति । वृक्षं त्यजति खगः इत्यत्र वृक्षस्य न अपादानसंज्ञा यतोहि अत्र विभागः उच्चरित धात्वर्थः वर्तते । यथोक्तं नागेशेन –वृक्षं त्यजति खगः इत्यादावपादानत्ववारणाय प्रकृतधात्ववाच्य इति[11] ।

**द्विविधः विभागः** – अपादानसंज्ञायां यः विभागः भवति, सः विभागः द्विविधः । प्रथमः वास्तवसम्बन्धपूर्वको वास्तविको भवति, यथा– वृक्षात्पर्णं पतति । द्वितीयः बुद्धिपरिकल्पितसम्बन्धपूर्वको विभागोऽपि भवति । यथा – माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः अत्र बुद्धिपरिकल्पितविभागाश्रये पञ्चम्याः विधानं सङ्गतम् । भणितञ्चैतद् सर्वं मञ्जूषायाम् – विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव । किन्तु बुद्धिपरिकल्पितसम्बधपूर्वको बुद्धिपरिकल्पितोऽपि । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः इत्यादौ बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमीसाधनात्[12]।

**द्विविधम् अपादानम्** – भर्तृहरेः अपाये यदुदासीनं चलं वा यदि वाचलम् इति कारिकानुसारेणापादानं द्विविधमुक्तम् – चलम् अचलञ्च । अचलं यथा– वृक्षात् पर्णं पतति' अत्र पतनक्रियया पर्णस्य साक्षाद् युक्तता अस्ति, किन्तु वृक्षः स्वस्थाने स्थिरः अतः वृक्षरूपी अपादानम् अचलमुच्यते । चलस्योदाहरणमस्ति 'धावतोऽश्वात्पतति" अत्र पतनक्रियायाः अवधिभूतः अश्वः अपि चलम् अर्थाद् अस्थिरतां बोधयति । तथा अवधिभूतत्वात् तस्य अपादानसंज्ञा । अतः चलम् अचलं द्विविधमेव ध्रुवम् ।यतोहि वियोगजनकव्यापारस्य अनाश्रयत्वात् तत्र अपादानत्वम् । एवमेव कुड्यात् पततोऽश्वात् पतति देवदत्तः अत्रापि पततः अश्वः ध्रुवमेवोच्यते । यतोहि देवदत्तस्य पतने वियोगजनकव्यापारस्य अश्वःआश्रयः नास्ति । अतः अपादानम् । यदा अश्वोऽपि पतति तदा तस्य पतने वियोगजनकव्यापारस्य अनाश्रयः कुड्यादेः अपादानं भवतिपततोध्रुव एवासौ यस्माद् अश्वात् पतत्यसौ । तस्यात्यश्वस्य पतने कुड्यादिध्रुवमिष्यते ।

'मेषान्मेषोऽपसर्पति' अस्मिन् उदाहरणे प्रथमतया एषाप्रतीतिः भवति यत् एकः मेषः स्थिरः द्वितीयः च धावति।
वस्तुतस्तुउभावपि मेषौ परस्परस्माद् अपसरतः । अत्र एकः मेषः अवधिभूतः द्वितीयश्च कर्ता स्वीक्रियते । यः अवधिभूतः मेषः सोऽपि स्थिरः नास्ति चलमस्ति । द्वयोर्मध्ये एकः अवधिरूपेण स्वीक्रियते तर्हि यः अवधिभूतः स्वीक्रियते तस्यैवापादानत्वेन स्वीकृतिः भवति । तस्मादेवापायः सम्भवति तस्य मेषस्य स्वतोअपसर्पणक्रियायां सत्यपि । अर्थात् अपसर्पणक्रियायाः उभयात्मकं सत्यपि सा क्रिया एकस्मादेव सम्बद्धा मन्यते, यतोहि अवधिः द्वयोर्मध्ये एकस्य स्वीक्रियते । एतद् सर्वंप्रतिपादितं हरिणा –

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते ।।
मेषान्तर क्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ।।

---

10.भट्टः नागेशः । परमलघुमञ्जूषा । कारकनिरूपणम् । पृ0 सं– 279 ।

11.तत्रैव प्र0 सं 279 ।

12.तत्रैव पृ0 सं– 278 ।

अभेदेन क्रियैका तु द्विसाध्या चेद्विवक्षिता ।
मेषावपाये कर्तारौ यद्यन्यो विद्यतेऽवधिः ।।[13]

अतः वक्तुं शक्यते यद् "मेषावपसर्पत इत्यत्र द्वाभ्यां मेषाभ्यां साध्या क्रिया यदि विवक्षिता तदा द्वौ मेषौ अपाये कर्तारौ मन्तव्यौ । यदन्यः पर्वतादिरवधिस्तदा तस्यापादानत्वम् । यथा पर्वतादपावर्तते, परस्परान् मेषावपसरत इति । अत्र परस्परपदवाच्यस्यावधित्वेनापादानत्वात् पञ्चमीत्युक्तं व्याकरणदर्शनप्रतिमायाम्"[14] ।

**त्रिविधम् अपादानम्** – अपादानकारकस्य विषयदृष्ट्या त्रयः भेदाः उक्ताः हरिणा –

निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधापादानमुच्यते।।[15]

तत्र प्रथमं **निर्दिष्टविषयापादानम्** – यः विषयः अर्थाद् विभागस्य निरूपणार्थःशब्दस्य अभिधाशक्त्या बोध्यते तत्र निर्दिष्टविषयः। अर्थाद् यत्र साक्षाद् धातुना अपायलक्षणविषयः निर्दिश्यते तत्र निर्दिष्टविषयः । यथा ग्रामाद् आगच्छति रामः । अत्र अपायस्य विभागरूपस्य द्विष्ठत्वाद् ग्रामरामानुभावपि अपाये कर्तारौ । तत्र ग्रामोऽचलः, रामस्तु चलः । अत्रागमनं स्वरूपेण जन्यजनकयोरभेदमादाय वाऽपायः । स चात्र साक्षादेव धातुना निर्दिष्ट इत्यतोऽत्रनिर्दिष्टविषयमपादानम् ।[16] एवमेव वृक्षात्पर्णं पतति अत्रापि साक्षाद् धातुना गतिः निर्दिष्टा ।

**द्वितीयम् उपात्तविषयमपादानम्** – यत्र विभागस्य निरूपणकर्ता अर्थः लक्षणावृत्त्या स्वीक्रियते अर्थाद् यत्र क्रिया अन्यक्रियार्थस्यअङ्गरूपे स्वार्थं व्यनक्ति तत्र उपात्तविषयमपादानम् । उक्तञ्च अम्बाकर्त्रीटीकायाम् – उपात्तो गुणभावेन प्रधानभावेन वा धात्वर्थेन स्वान्तर्गृहीतोऽपायलक्षणो विषयो येन तदुपात्तविषयमित्यर्थः ।[17] यथा – बलाहकाद् विद्योतते विद्युत । अत्र दीप्तिः इत्यर्थायाः विद्योतनक्रियया विभागप्रतीतिरभावाल्लक्षणावृत्त्या निस्सरणपूर्वके विद्योतनार्थे 'विद्योतते' पदस्यशक्तिं मत्वा अर्थस्य संगतिः भवति । अर्थाद् यदा विद्युत भासते तदा सा आविर्भूत्वा समक्षमायाति । उक्तः बलाहकाद्विद्योतते विद्युद् एतद् वाक्यं बलाहकान्निःसृत्य विद्युद्विद्योतते इति लक्ष्यार्थे प्रयुज्यते ।

**तृतीयम् अपेक्षितक्रियमपादानम्** – यत्र कस्याश्चित् क्रियायाः अपेक्षा भवति तत्र अपेक्षितक्रियम् । यथोक्तम् – अपेक्षिताक्रियाऽपायरूपा यस्य तदपेक्षितक्रियं तृतीयमपादानम्[18] यथा कुतो भवान् ? पाटलिपुत्रात् । अत्र आगतः इति क्रियापदस्य अपेक्षा अस्ति ।

**भोजः श्रृंगारप्रकाशे** अपादानस्य भेदत्रयं पाणिनेः सूत्रेषुदर्शितवान् । तस्य मतेध्रुवमपायेऽपादानम् इति सूत्रं निर्दिष्टविषयम् । भीत्रार्थानां भयहेतुः[19], पराजेरसोढः[20] इत्यादीनि उपात्तविषयम् । पञ्चमीविभक्तेः[21]आदि अपेक्षितक्रियम्[22] ।

---

[13].भर्तृहरिः। वाक्यपदीयम् । तृतीयं काण्डम् ।साधसमुद्देशः अपादानाधिकारः । कारिकासं. 140,141, 142 ।
पृ0 सं. – 358,359 ।

[14].श्रीरामाज्ञापाण्डेयः । व्याकरणदर्शनप्रतिमा । साधननिरूपणम् । अपादानविचारः । पृ. सं. 235 ।

[15].भर्तृहरिः। वाक्यपदीयम्।तृतीयं काण्डम् ।साधसमुद्देशः अपादानाधिकारः। कारिका सं. 136, पृ0 सं. 354 ।

[16]. तत्रैव, अम्बाकर्त्री टीका ।

[17]. तत्रैव ।

[18]. तत्रैव ।

**पञ्चमीविभक्ति**:- अपादानत्वाद् "अपादाने पञ्चमी"[23] अनेन सूत्रेण पञ्चमी विभक्तिः भवति। अनभिहिते इति अधिकारिकपदस्य अनुवृत्तिजन्यप्रभावः विद्यते। तस्माद् अनभिहिते अपादानकारके पञ्चमीविभक्तिः भवति, अभिहिते न। तस्माद् बिभेत्यस्मादिति भीमः इत्यत्र भीमादयोऽपादाने[24] अनेन सूत्रेण भी धातोरपादाने 'मक्' उणादिकृत्प्रत्ययः विहितः। अतः कृत्प्रत्ययेन अपादानस्य उक्ते सति भीम शब्दे प्रकृतसूत्रेण पञ्चमीविभक्तिः न भवति। एवमेव उद्धृतम् ओदनं यस्याः' इत्यत्र विग्रहे पञ्चम्यर्थे बहुव्रीहिसमासत्वाद् उद्धृतौदना शब्दः निष्पद्यते । समासेन कारकस्योक्तत्वाद्न पञ्चमी। उभयत्र प्रातिपदिकार्थे प्रथमैव भवति। अपादानपञ्चम्याः साहित्यगतानि कानिचन उदाहरणानि –

1. न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।[25] 2. गाण्डीवं स्रंसते हस्तात् ।[26] 3. स्वैरं वनादुपनयन्तु तपोधनानि[27]।

4. अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।
तामवारोहयत् पत्नीं रथाद् अवततार च[28] ।। इत्यादीनि ।

ध्रुवमपायेऽपादानम् अस्मिन् सूत्रे कारके अधिकारस्य का आवश्यकता ? तदोच्यते कारकस्यैवापादानसंज्ञा स्याद् न तु अकारकस्य । यथावृक्षस्य पर्णं पतति अस्मिन् वाक्ये वृक्षस्य सम्बन्धार्थः विवक्षितः। सम्बन्धः कारकं न भवति । अतः विवक्षाभावाद् न पञ्चमी । परन्तु यदि वृक्षात् पर्णं पतति इत्यर्थः विवक्षितो स्यात् तदा अपादानत्वात् पञ्चमी। यतोहि विवक्षातः कारकाणि भवन्ति' इत्युक्त्यनुसारं अपादानकारकमपि विवक्षाधीनमेव भवति। प्रतिपादितमेतद् सर्वं भाष्ये ।[29] अत एवोक्तं वाक्यपदीये –

गतिर्विना त्ववधिना नापाय इति गम्यते ।

---

19. पा0 सू0 1–4–25 ।

20. पा0 सू0 1–4–26 ।

21. पा0 सू0 2–3–42 ।

22. संस्कृत व्याकरण दर्शन । रामसुरेश त्रिपाठी । अध्याय 7। कारक (साधन) विचार । पृ सं– 294

23. पा0 सू02–3–28 ।

24. पा0 सू0 3–4–74 ।

25. भर्तृहरिः, शतकत्रयम्, नीतिशतकम् । श्लोकसं. 10 । पृ. सं. 7 ।

26. श्रीमद्भगवद्गीता 1.30 ।

27. स्वप्नवासवदत्तम् 1. 6 । पृ.सं. 46 ।

28. रघुवंशम् । 1.54 । पृ. सं. 25 ।

29. महाभाष्यम् 11.4.3। कारके सूत्रे । पृ0सं.–241। अपादानं च वृक्षस्य पर्णं पततीति। अपादानसंज्ञा च प्राप्नोति क्व।वृक्षस्य पर्णं पतति, कुड्यस्य पिण्डः पततीति। न वाऽपायस्याविवक्षितत्वात् । न वा एष दोषः । किं कारणम् ? अपायस्याविवक्षितत्वात् । नात्रापायो विवक्षितः । किं तर्हि ? सम्बन्धः । यदा चापायो विवक्षितो भवति भवति तदाऽपादानसंज्ञा । तद्यथा – वृक्षात्पर्णं पततीति सम्बन्धस्तु तदा न विवक्षितो भवति न ज्ञायते कङ्कस्य वा कुररस्य वेतीति।

वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शितम् ।।[30]

अपादानमुत्तराणि कारकाणि बाधन्ते[31] इत्युक्तं भाष्ये । तथा चोक्तैः चोत्तरैः कारकैरपादानस्य बाधितत्वाद् बलाहकाद् विद्योतते, बलाहके विद्योतते, बलाहको विद्योतते, इतिभाष्ये संज्ञानां समावेशो दर्शितो विरुद्ध इत्यैशङ्क्य भाष्यं समर्थयितुमाह –

भेदाभेदौ पृथग्भावः स्थितिश्चेति विरोधिनः ।
युगपन्न विवक्ष्यन्ते सर्वे धर्मा वलाहके ।।[32]

अत्रोक्तं **हेलाराजेन** – धूमज्योतिः सलिलमरुतां संघातो बलाहकः, तत्रावयवस्य ज्योतिषो विद्योतनम्। तच्च ज्योतिर्यदा तस्मात् समुदायात्मनो बलाहकाद् भेदेन विवक्ष्येत, तदा भेदविवक्षायां पृथग्भावेनैव वा विवक्ष्येत तत्रावस्थानेन वा। यदा पृथग्भावेन विवक्ष्यते तदा बलाहकोऽवधिः पृथग्भावलक्षणस्यापायस्येत्युपात्तविषयमिदमपादानं व्याख्यातम् बलाहकाद् विद्योतते। यदा तु निराधारस्य तेजसोऽवस्थानाभावाद् बलाहकोऽवस्थितिहेतुत्वादाधारभावेन विवक्ष्यते तदाधिकरणसंज्ञोऽसौ जायते बलाहके विद्योतते' इति । बलाहके स्थित्वा प्रकाशत इत्यर्थ । यदा तु सर्वेषां समुदायो बलाहकाख्यस्तेजोऽवयववशाद् विद्योतनसमर्थो विवक्ष्यते तदा कर्तृशक्तिरेवोज्जृम्भते, बलाहको विद्योतते इति[33] ।

**ध्रुवमपायेऽपादानम् इति सूत्रातिरिक्तत्वमपादानत्वम्**–महाभाष्यकारमतानुसारं कारकप्रकरणेगौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः[34] इति न्यायस्य प्रवृत्तिर्न भवति । तथा साधकतमं करणम्[35] इत्यत्र तमब्ग्रहणात् कारकाधिकारेऽतिशयो न विवक्षित इति ज्ञाप्यत इति गौणमुख्यन्यायाप्रवृत्त्या गौणेऽप्यत्र बौद्धेऽपायेऽपादानत्वप्रयोजकत्वमविरुद्धम् । तथा हि सर्वोऽपि कारकव्यवहारो विवक्षाविषयत्वेन बुद्ध्यवस्थानिबन्धन एव । तदुक्तं हरिणा –

बुद्ध्या समीहितैकत्वान् पञ्चालान् कुरुभिर्यदा ।
पुनर्विभजते वक्ता तदाऽपायः प्रतीयते [36]।। इति ।

एवम् – "ध्रुवमपायेऽपादानम्' इति सामान्यसूत्रेणैवापादानत्वे सिद्धे "पञ्चमी विभक्ते"[37] इति सूत्रारम्भो बौद्धमपायमजानानं प्रति विवक्षानियमार्थम्, अपायविवक्षैवात्र कर्तव्या, न तु कदाचिदपायाविवक्षा इति[38] । अस्य सूत्रस्यापि भाष्ये प्रत्याख्यानं कृतम् ।

भट्टोजिदीक्षितेन जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्[39] इति वार्त्तिकं अपादाने पञ्चमी इति सूत्रे उक्तम् । वार्तिकार्थः वर्तते– जुगुप्साविरामप्रदार्थानां धातूनां प्रयोगे कारकम् अपादानसंज्ञं स्यात् । यथा – पापाज्जुगुप्सते । अत्र

---

30.भर्तृहरिः। वाक्यपदीयम्। तृतीयं काण्डम्।साधनसमुद्देशः अपादानाधिकारः। कारिका सं. 143, पृ0 सं. 360 ।

31 महाभाष्यम् 1.4.1 , आकडार सूत्रे । पृ0 सं – 201 ।

32.भर्तृहरिः। वाक्यपदीयम् । तृतीयं काण्डं,साधनसमुद्देशः अपादानाधिकारः। कारिका सं. 144, पृ0 सं. 362।

33.भर्तृहरिः। वाक्यपदीयम् । तृतीयं काण्डं,।साधनसमुद्देशः। कारिकासं. 144, हेलाराजव्याख्या, पृ0 सं. 363।

34.परिभाषेन्दुशेखरः। शास्त्रत्वसम्पादनोद्देशं प्रथमं प्रकरणम्। परिभाषा संख्या–15 । पृ0 सं. 70 ।

35.पा0 सू01–4–25।

36.भर्तृहरिः। वाक्यपदीयम् । तृतीयं काण्डम्।साधनसमुद्देशः अपादानाधिकारः । कारिका सं. 4, पृ0 सं. 105 ।

37. पा0 सू02–3–42 ।

38. भर्तृहरिः।वाक्यपदीयम् । तृतीयं काण्डम्।साधनसमुद्देशः। कारिकासं.147, अम्बाकर्त्रीव्याख्या, पृ. सं.370 ।

पापविषये न प्रवर्तत इत्यर्थः ।[40] एवमेव पापाद् विरमतीति । पापादित्यनुषज्यते । पापविषये न प्रवर्तत इत्यर्थः । धर्मात् प्रमाद्यतीति । धर्मविषये गुह्यतीत्यर्थः ।[41]

अतः उपर्युक्तोदाहरणेषु बुद्धिगतापायाश्रयणत्वाद् ध्रुवमपायेऽपादानम् इति सूत्रेणैवअपादानसंज्ञा सिद्धमिति वार्त्तिकमिदं भाष्ये प्रत्याख्यातम्।[42] एवमेव भीत्रार्थानां भयहेतुः[43] अत्र चोराद् विभेति चोरात्त्रायते इत्यादिस्थलेष्वपि बुद्धिकल्पितविश्लेषावधित्वमादायापादानत्वं सिद्धमिति इदं सूत्रं भाष्ये प्रत्याख्यातम्[44] । उक्तञ्च भाष्ये – "य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद् भवति स पश्यति यदीमं चोराः पश्यन्ति ध्रुवमस्य वधबन्धनादिपरिक्लेशा इति। स बुद्ध्या संप्राप्य निवर्तयति। तत्र 'ध्रुवमपायेऽपादान'मित्येव सिद्धम्" [45]। पराजेरसोढः[46] अस्यापि प्रत्याख्यानं कृतम् । तत्रोच्यते "अयमपि योगः शक्योऽवक्तुम् । कथमध्ययनात् पराजयते इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखमध्ययनं दुर्धरं च, गुरवश्च दुरुपचारा इति स बुद्धया सम्प्राप्य निवर्तते। तत्र "ध्रुवमपायेऽपादानम्" इत्येव सिद्धमिति"[47]। वारणार्थानामीप्सितः, अन्तर्धौ येनादर्शनमिच्छति, आख्यातोपयोगे जनिकर्तुः प्रकृतिः, भुवः प्रभवः इत्यादीनामप्यपादानसंज्ञाविधायकानामपि प्रपञ्चार्थमेवाभ्युपेयम्, बौद्धस्यापादानत्वस्य विवक्षितत्वात् ।

**निष्कर्ष**:-अतः सारांशेन इदं वक्तुं शक्यते यदपादानं सर्वत्र ध्रुवमपायेऽपादानम् इत्येनेनैव लक्षितम् । त्रिविधादपादानादपरं त्वबुधानां सौकर्येणापादानत्वप्रतिपत्तये प्रपञ्चार्थम् । यथोक्तं भर्तृहरिणा –

निर्धारणे विभक्ते यो भीत्रादीनां च यो विधिः ।
उपात्तापेक्षितापायःसोऽबुधप्रतिपत्तये[48] ।। इति शम् ॥

**सन्दर्भग्रन्थसूची –**

1. पाणिनिः । अष्टाध्यायी । ईश्वरचन्द्रः, पण्डितः । चन्द्रलेखाव्याख्योपेता । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2017 ।
2. पतञ्जलिः। व्याकरणमहाभाष्यम् । भट्टः नागेशः, कैयटः, भाष्यप्रदीपोद्द्योतसमुल्लसितम् । जोशी भार्गवशास्त्री, संशोधकः । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2018 ।

---

39. वैयाकरणसिद्धान्तकौमुदी । अपादाने पञ्चमी सूत्रस्यवार्तिकमिदम् । पृ0सं. 87 ।

40. वैया0 सि0 कौ0 । बालमनोरमा पृ0सं.- 755 ।

41. तत्रैव पृ0सं. – 756 ।

42. महाभाष्यम् 1.4.3 , ध्रुवमपाये सूत्रे। पृ0 सं–248इह धर्माद्विरमति धर्मान्निवर्तते इति। इह य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति – नेदं किंचिद्धर्मो नामनैनं करिष्यामीति स बुद्ध्या संप्राप्य निवर्तते । तत्रध्रुवमपायेऽपादानम्" इत्येव सिद्धम् ।

43. पा0 सू02–3–25।

44. दीक्षितः भट्टोजिः। वैयाकरणसिद्धान्तकौमुदी। भीत्रार्थानां भयहेतुः सूत्रस्था बालमनोरमाव्याख्या। पृ सं – 757 ।

45. महाभाष्यम् 1.4.3, भीत्रार्थानां भयहेतुः सूत्रे । पृ0 सं – 250 ।

46. पा0 सू01–4–26।

47. महाभाष्यम् 1.4.3, पराजरसोढः सूत्रे । पृ0 सं – 250 ।

48. भर्तृहरिः।वाक्यपदीयम्।तृतीयं काण्डम्।साधनसमुद्देशः अपादानाधिकारः। कारिका सं. 147, पृ0 सं.368 ।

3. दीक्षित:, भट्टोजि: । वैयाकरणसिद्धान्तकौमुदी । पाण्डेय: गोपालदत्त:, व्याख्याकार: । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 ।
4. भर्तृहरि: । वाक्यपदीयम्, ब्रह्मकाण्डम् । शुक्ल: सूर्यनारायण:, भावप्रदीपव्याख्या । चौखम्बा संस्कृत संस्थान वाराणसी, वि. सं. 2055 (1998) ।
5. भट्ट:, नागेश: । परमलघुमञ्जूषा । लोकमणिदाहाल:, किरणावली संस्कृतव्याख्योपत हिन्द्यनुवादसहिता । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2006 ।
6. जयादित्य:, वामन:। काशिका । मिश्र: नारायण:, प्रकाशहिन्दीव्याख्योपेता । चौखम्बासंस्कृतसंस्थानं वाराणसी, 2001 ।
7. भट्ट: नागेश: । लघुशब्देन्दुशेखर:। मिश्र: भैरव:, भैरवीचन्द्रकलाटीका । शास्त्री, वैकुण्ठनाथ:, वैकुण्ठी हिन्दीव्याख्या । चौखम्बासुरभारती प्रकाशनं वाराणसी ,2006 ।
8. वरदराज: । लघुसिद्धान्तकौमुदी । शास्त्री, भीमसेन: । भैमीव्याख्या, तृतीयभाग: । भैमीप्रकाशनम् । 2015 ।
9. भट्ट: नागेश: । परिभाषेन्दुशेखर: । मिश्र:, विश्वनाथ:, सुबोधिनीहिन्दीव्याख्योपेत:। चौखम्बासुरभारती प्रकाशनं वाराणसी, 2005 ।
10. दीक्षित: भट्टोजि: । वैयाकरणसिद्धान्तकौमुदी । दीक्षित: वासुदेव:, बालमनोरमाव्याख्या । पाण्डेय: गोपालदत्त:, दीपिकाहिन्दीव्याख्योपेता । चौखम्बा सुरभारती प्रकाशन वाराणसी, 2007 ।
11. दीक्षित: भट्टोजि: । वैयाकरणसिद्धान्तकौमुदी । सरस्वती, ज्ञानेन्द्र: । दीक्षित: वासुदेव: । तत्त्वबोधिनीबालमनोरमासहिता, प्रथमो भाग:। चतुर्वेद: गिरिधरशर्मा । विद्याभास्कर: परमेश्वरानन्दशर्मा । सम्पादकौ । मोतीलालबनारसीदास वाराणसी, 1991 ।
12. मङ्गलाराम । संस्कृत व्याकरण की दार्शनिक मीमांसा । राजस्थानीग्रन्थागारजोधपुर, 1995 ।
13. भट्ट: अन्नम् । तर्कसंग्रह: । तर्कसंग्रहदीपिका- न्यायवोधिनी- पदकृत्य, श्रीनिवास मुखोल्लासिनी संस्कृतहिन्दीव्याख्यासंवलित । गोविन्दाचार्य:, सम्पादक:।चौखम्बासुरभारती प्रकाशनं वाराणसी, 2017 ।
14. श्रीमद्भगवद्गीता । गीताप्रेस गोरखपुर, - 273005 । गोविन्दभवन कार्यालय, कोलकत्ता संस्थान । सं. 2075 अस्सीवाँ पुनर्मुद्रणम् ।
15. कालिदास: । रघुवंशम् । मल्लिनाथ:, संजीवनी व्याख्या । चौखम्बासुरभारती प्रकाशनं वाराणसी, 2023 ।
16. भट्ट: कौण्ड: । वैयाकरणभूषणसार: । हरिवल्लभ:, दर्पणव्याख्या । द्विवेदी चन्द्रिकाप्रसाद: , सुबोधिनी - हिन्दीव्याख्योपेतश्च । चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2005 ।
17. भट्टाचार्य:, गदाधर: । व्युत्पत्तिवाद: । तिवारी हरिनारायण: । तत्त्वबोधिनी संस्कृतटीका एवं हिन्दी व्याख्यासहिता । चौखम्बाविद्याभवनं वाराणसी । 2005 ।
18. भर्तृहरि:। शतकत्रयम् । धनसारगणि व्याख्यायुतम् । परिमल पब्लिकेशन्स दिल्ली । संस्करणम् 2023 ।
19. भास: । स्वप्नवासवदत्तम् । गुरुप्रसादशास्त्री । अभिनवराजलक्ष्मीव्याख्या । भार्गवपुस्तकालय, गापघाट, बनारस-1 । तृतीयं संस्करणम् - 2000 ।
20. दीक्षित: भट्टोजि: । प्रौढमनोरमा । भैरवीव्याख्यासहिता, चौखम्बासंस्कृतसंस्थानं वाराणसी, तृतीयसंस्करणम्, वि. सं. 2059 ।

21. भट्ट: नागेश: । सिद्धान्तलघुमञ्जूषा । भट्ट: नागेश:, नागेशभावप्रकाश:, सुबर्थवाद: । महामहोपाध्याय पेरिसूर्यनारायणशास्त्री, सम्पादक: 1992 ।

22. रामचन्द्र: । प्रक्रियाकौमुदी, द्वितीयो भाग: । पण्डित: कृष्ण:, प्रकाशव्याख्योपेता । मिश्र: मुरलीधर: , सम्पादक: । सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: वाराणसी । द्वितीयं संस्करणम् । 2000 ।

23. भर्तृहरि:, वाक्यपदीयम् । तृतीयं काण्डम्, द्वितीयो भाग: । पद्मश्री शर्मा, पण्डितश्रीरघुनाथ:, अम्बाकर्त्रीव्याख्याकार: सम्पादकश्च । सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: वाराणसी, 2016 ।

24. श्रीरामाज्ञापाण्डेय: । व्याकरणदर्शनप्रतिमा । श्रीरामगोविन्दशुक्ल:,सम्पादक:। सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: वाराणसी, 2016 ।

25. श्रीजयरामन्यायपञ्चानन: । कारकवाद: । श्रीनिवासवरखेडि, सम्पादक: । पूर्णप्रज्ञसंशोधनमन्दिरम् , पूर्णप्रज्ञविद्यापीठम्, बेङ्लूरु – 560 028 । प्रथमं संस्करणं 2007 ।